Reg. No. | | | | | | | | | |

# BCASKL 281

## Choice Based Credit System IV Semester B.C.A. Degree Examination, September 2022
## (2020 – 21 Batch Onwards)
## SAMSKRITAM

Time : 3 Hours | Max. Marks : 80

*सूचना : 1) **संस्कृत**भाषया, **कर्णाटक**भाषया, **आङ्ग्ल**भाषया वा उत्तराणि लिखत ।*
*2) प्रश्नसंख्या –**VI, VII, VIII** एतेषाम् उत्तराणि **संस्कृते**न एव लेखनीयानि ।*

I. अधोनिर्दिष्टेषु **द्वयोः** अनुवादं कृत्वा विवृणुत । **(2×5=10)**

1.1) भोजनकुतूहलं नाम पाकशास्त्रग्रन्थे द्रव्यगुणागुणकथनावसरे एवं प्रतिपादितम्–पूगीफलेन सुधाचूर्णेन च संमील्य ताम्बूलचर्वणं कुर्यात् । विशेषत: निद्राया:, भोजनस्य च अनन्तरम् । यदि वमनं भवति तदापि ताम्बूलं तत् शमनाय उपयोगि । क्षीरं निपीय ताम्बूलं न सेवेत । क्षय–कुष्ठ–अपस्मार–कामला–प्रमेह–श्वित्र–प्रवाहिकादिरोगिण: नैव ताम्बूलचर्वणं कुर्यु: ।

किन्तु एक: दोष: अस्ति यत्, निरन्तर खादनात् ताम्बूलचर्वणं व्यसनं भवति । अस्य अतिसेवनात् देह–दृक्–केश–दन्त–अग्नि–श्रोत्र–वर्णबलानां क्षय: सम्भवति । पित्तवातवर्धनं जायते ।

1.2) गणितं तावत् विज्ञानस्य मूलम् । अद्य समग्रे प्रपञ्चे उपयुज्यमाना: अङ्का: (१, २, ३, ...), शून्यं (०), दशमानपद्धतिश्च भारते वर्षे अन्वैष्यन्त । रोमन्पद्धत्या संख्यानां लेखने महत् कष्टं सकलैरनुभूयते स्म । अत: तत् त्यक्त्वा सर्वे देशा: भारतान्विष्टां पद्धतिमेव स्वीचक्रु: । इयं पद्धति: अरबाणां द्वारा यूरोपं प्राप । अत: इमाम् ‘अरबीया पद्धति:, अरबीया: अङ्का:’ इति केचन भ्रान्त्या व्यवहरन्ति ।

1.3) अत्यम्बुपानान्न विपच्यतेऽन्नम्
अनम्बुपानाच्च स एव दोष: ।
तस्मान्नरो वह्निविवर्धनाय
मुहुर्मुहुर्वारि पिबेदभूरि ।।

II. अधोनिर्दिष्टेषु **पञ्च** वाक्यानां विवरणं लिखत । **(5×3=15)**

2.1) पञ्चाम्ररोपी नरकं न याति ।

2.2) पवनसंयुक्तः पादैः पिबति पादपः ।

2.3) जहि शत्रुं महाबाहो कामरूपं दुरासदम् ।

2.4) मिताहारेण आयुः वर्धते ।

2.5) उत्तमैः साकं कलहं नाचरेत् ।

2.6) मोक्षो नाम दुःखत्रयात् मुक्तिः ।

2.7) सभायां विदुषां राज्ञां कुर्यात् ताम्बूलचर्वणम् ।

2.8) प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः ।

III. **द्वयोः** प्रबन्धात्मकम् उत्तरं लिखत । **(2×8=16)**

3.1) नृपतुङ्गस्य न्यायनिष्ठां निरूपयत ।

3.2) ताम्बूलस्य उपयोगाः के ? विवृणुत ।

3.3) 'भगवद्गीतायाँ कर्मयोगस्य महत्त्वम्'–एनं विषयमधिकृत्य प्रबन्धं रचयत ।

3.4) प्राचीनभारतीयखगोलशास्त्रम् अधिकृत्य प्रबन्धं लिखत ।

IV. अधोनिर्दिष्टेषु न्याय**द्वयं** विशदयत । **(2×4=8)**

4.1) काकतालीयन्यायः ।

4.2) घट्टकुटीप्रभातन्यायः ।

4.3) टिट्टिभन्यायः ।

4.4) वधूहस्तमाषमापनन्यायः ।

V. **द्वयोः** टिप्पणीं रचयत । **(2×5=10)**

5.1) यज्ञः कर्म समुद्भवः ।

5.2) मनुस्मृतौ वर्णिताः सस्यभेदप्रकाराः ।

5.3) ताम्बूलपत्रस्य भेदः ।

5.4) योगस्य अष्टाङ्गानि ।

VI. **द्वयोः** संस्कृतभाषया टिप्पणीं रचयत । **(2×5=10)**

6.1) भगवद्गीता ।

6.2) दुःखत्रयम् ।

6.3) आयुर्वेदः ।

6.4) जलपानस्य महत्त्वम् ।

VII. अधोनिर्दिष्टेषु **षट्** वाक्यानि पाठ्याधारेण पूरयत । **(6×1=6)**

7.1) ________ हरप्पासभ्यतायाः अपि पूर्वतनः ।

( सामवेदः, ऋग्वेदः, अथर्ववेदः)

7.2) योगशास्त्रप्रवर्तकः ________ ।

( पतञ्जलिः, पाणिनिः, वररुचिः)

7.3) शिराखादनं तु ________ नाशयति ।

( विवेकं, चिन्तां, बुद्धिम्)

7.4) इन्द्रियार्थान् विमूढात्मा ________स उच्यते ।

( सत्याचारः, मिथ्याचारः, नित्याचारः )

7.5) ये पुष्पैः फलन्ति ते ________।

( लताः, ओषधयः, द्रुमाः)

7.6) आयुर्वेदः ________ वेदस्य उपवेदत्वेन परिगणितः ।

( ऋग्, अथर्व, साम )

7.7) अधिकजलपानेन ________ जायते ।

( पिपासा, जीर्णता, अजीर्णता )

7.8) नृपतुङ्गस्य पुत्रस्य नाम ________।

( रामः, कृष्णः, गोविन्दः)

VIII. संयोजयत । **(5×1=5)**

| | |
|---|---|
| 8.1) सूर्यः | धर्मसाधनम् |
| 8.2) पराशरः | नावनम् |
| 8.3) शरीरम् | पृथिव्याधारः |
| 8.4) नस्यम् | वेण्वादयः |
| 8.5) त्वक्साराः | कृषिसङ्ग्रहः |
| | बृहत्संहिता |